National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(60): 171-173
© 2025 NJHSR
www.sanskritarticle.com

**संजीता कुमारी**
शोधच्छात्रा, अद्वैतवेदान्तविभाग,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्व-
विद्यालयः (केन्द्रीयविश्वविद्यालयः)

**Correspondence:**
**संजीता कुमारी**
शोधच्छात्रा, अद्वैतवेदान्तविभाग,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृतविश्व-
विद्यालयः (केन्द्रीयविश्वविद्यालयः)

# वेदान्तदर्शनेविवर्त्तवादः

**संजीता कुमारी**

संक्षेप शारीरककारस्य मतम् संक्षेपशारीरिककारः सर्वज्ञात्ममुनैः विचारोऽस्ति यत् सम्पूर्ण जगतोत्पत्तिः स्थितिः तथा लयं प्रति उपादाननिमित्तभूत यत् कारणं अस्ति। सः शुद्ध ब्रह्म एवं अस्ति। **निमित्तं च योनिश्वयत् कारणं यत् परब्रह्मसर्वस्य जन्मादिभाजः इति स्पष्टमाचष्ट एषा श्रुतिर्नः कथं सिद्धवल्लक्षणं सिद्धिबाह्यम्**[1]।

सिद्धान्तलेशकारः अप्पयदीक्षितेन सर्वज्ञात्ममुनेः मतस्यैव उल्लेखः कृतः वर्तते। अत्र संक्षेपशारीरका-नुसारिणः केचिदाहुः शुद्धमेवोपदानम् जन्मादिसूत्र तद्भाष्ययोरुप-दानत्वस्यज्ञेयन्ब्रह्मलक्षणत्वोक्तेः।

अद्वैतसिद्धेः टीकाकारः गौडब्रह्मानन्द अनुसारेण संक्षेपशारीरककारस्य मतं अस्ति यत् **अविद्योपहित चैतन्यः जगतः कारणं वर्तते**[2]।

**विवरणकारस्य मतम्- विवरणानुयायिनां मतानुसारेण-**

यः 'सर्वज्ञः' 'सर्ववित्' अस्ति तथा तपोज्ञानमयश्च वर्तते तादृश सर्वज्ञब्रह्मतः हिरण्यगर्भः नाम रूपःअन्तश्च उत्पद्यन्ते; अयं श्रुतितात्पर्यानुसारं सर्वज्ञत्वादि

धर्मेण युक्तः मायाया शवलित ईश्वररूप ब्रह्म एवं जगतः उपादानकारणं वर्तते ।

ब्रह्मानन्देन विवरणकारस्य मतं विवर्णयित्वा उच्यते यत् ईश्वर-जीव अविद्यायाश्च क्रमशः शुद्ध चैतन्यस्य बिम्ब प्रतिबिम्ब रुपः वर्तते। **इदमेव शुद्धचैतन्यैव अनुपहित ईश्वरः उपहित अवस्थायां सत्तां प्राप्यन्ते, एतेरेव सर्वकन्तिक साक्षी वर्तते एदमेव जगतः उपादानं कारणं वर्तते**[3]।

वाचस्पतिमिश्रस्यमतम्- अद्वैतवेदान्तस्य समालोचकः अप्पयदीक्षितेन वाचस्पतिमिश्रस्य कार्यकारणसम्बन्धितः सिद्धान्तस्य विवेचनं कुर्वन् कथ्यते यत् वाचस्पत्तिमिश्रस्य मतानुसारं अज्ञानेन विषयीकृतः (मायाया) ब्रह्म एवं जगतः उपादानकारणं वर्तते तथा च माया सहकारी कारणम् वर्तते।

**वाचस्पति मिश्रस्तु जीवाश्रितमायाविषयीकृतम् ब्रह्मस्वत एव जाड्याश्रय-प्रपंचकारेण विवर्तमानतयोपादानमिति मायासहकारित्वम्**[4] ।

**मधुसूदनसरस्वतेः मतम्-** अद्वैतसिद्धिकारेण मधुसूदनसरस्वतिना मतानुसारे अज्ञानं एवं अस्य द्वैतात्मकस्य जगतः उपादानम् कारणं वर्तते। अज्ञान उपहितत्वादेव ब्रह्म जगतः कारणं उच्यते।

**अस्यदैत्येन्द्रजालस्ययदुपादानकारणम् अज्ञानं तदुपपाश्रित्य ब्रह्मकारणमुच्यते**[5] ।

**प्रकाशानन्दस्य मतम्-** वेदान्तसिद्धान्तमुक्तावल्याः लेखकः प्रकाशानन्देन जगत अज्ञानोपहितं मन्यते।

**संयम परि अस्य मतानुसारं अज्ञानमेव जगतः निमित्तकारणं तथा च सैव उपादानकारणमपि वर्तते**[6]।

अयमेव विषये वेदान्तसारः आचार्यसदानन्देन उच्यते यत् शक्तिद्वयवदज्ञानोपहितं चैतन्यं स्वप्रधानतया निमित्तं स्वोपाधिप्रधानतयोपादानं च भवति। यथा-

**लूतातन्तुकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीरप्रधानतयोपादानं च भवति**[7]।

**यथोर्णनाभिः सृजते गृह्यते च यथा पृथिव्यामोषधयः सम्भवन्ति।**
**यथा सतः पुरुषात्केसलोमानि तथाक्षरात्सम्भवतीह विश्वम्**[8]।।

अन्येषां मतम्- मायाऽविद्यायोः भेदयोः आधारिकुकृत्य एवं कैश्चिद्धि विद्वद्धिः जगतः कार्यकारणसिद्धान्तसंबन्धीत मतस्य विभिन्न दृष्टिभ्यः विचार वैविध्यत्वं प्रकटीकृतः। मायाऽविद्यायोः मध्ये ये भेदं स्वीकुर्वन्ति तेषां विदुषां मतमिदमस्ति यत् अकाशादि महाभूतप्रपञ्चः ईश्वरेविद्यमानः माय...मायाऽविद्यायोः भेदयोः आधारिकृत्य कानिचन् समालोचकानां विदुषां विचारः एवं वर्तते यत् यथा आकाशदि पञ्चमहाभूतानि प्रपञ्च ईश्वराश्रितं मायायाः परिणामः वर्तते तेषाञ्च मध्ये जीव एव उपादान कारणं वर्तते न तु ईश्वरः इति।

उपर्युक्त मतस्य अनवलम्बिनः अद्वैतवेदान्तस्य कानिचनैः आचार्यैः मायाऽविद्ययोः मध्ये अभेदं मत्वा भिन्न-भिन्न मतानां स्थापना कृतं वर्तते। केचन आचार्याणां मतमेवं वर्तते यत् यद्यपि आकाशादि पञ्चमहाभूतन्य प्रपञ्चस्य ईश्वरः एवं उपादानकारणं वर्तते। परन्तु अन्तकरणादिषु जीवस्य तादात्म्य प्रतीत्तिः जाते सति अन्तकरणादिनां उपादानं जीवः एव वर्तते।

विद्वत्सु सपक्षस्य विदुषां विचारः एवं वर्तते । यत् ब्रह्म तथा च माया उभयमपि जगत् प्रति उपादानकारणं वर्तते। उभयोः मध्ये भिन्नता केवलमिदमेव वर्तते यत्-

ब्रह्म विव...उत्सृजेदिति। यथा- सूता तन्तु प्रतिस्वप्रधानतया निमित्तं स्वशरीर प्रधानतयोपादानं वर्तते मैव ब्रह्म उपादानं निमित्तं उभयमपि वर्तते।

विवर्तवादः

**"उपादानत्वाभिमतवस्तुविलक्षणत्वे सति तदवस्थाविशेषत्वम्[९]"**

अर्थात् उपादानत्वरूपेण परिगृहीतवस्तुना विलक्षणी भूत्वा तं उपादानरूपं वस्तुनः अवस्थाविशेषः एव विवर्ती वर्तते। अत्र चित्तं तथा च जड़त्वरूप धर्मेण वैलक्षण्यं विवक्षितं वर्तते। शुक्तिरज्वौ शुक्त्यावच्छिन्नस्य चैतन्यस्य विवर्तः वर्तते, अत्र प्रोक्तस्य अक्षणस्य समन्वयं सुष्टुभवति, शुक्रयावच्छिन्नः चैतन्यः एवं अविद्यायाः समाधानेन रजताकारेण विवर्तभावं प्रति प्राप्प्रोतिः अतः चैतन्यत्वेन रजतत्वं निश्चयप्रयं विलक्षणं बर्तते यतोहि चैतन्येऽव चित्वधर्मः वर्तते तथा च रजत्वे जडत्वं वर्तते। ब्रह्मणि जगती चापि चित्... चित्तजडत्वयोः मध्ये वैलक्षयं जाते सति ब्रह्मणः विवर्तजगते अपि लक्षणसमन्वयं भवति। अस्याः परिभाषायाः अनुसारेण परमार्थ सत्यब्रह्मणः मिथ्याजगतः सत्ता विषमः भूते सत्तिः जगत ब्रह्मणः विवर्त वर्तते। इवं निस्सन्देहेन सत्यमस्ति यत् मिथ्याजगतः उत्पत्तेः कारणं अधिष्ठानरूपं ब्रह्म एवं वर्तते, परन्तु अस्य न कदापि एताद्धार्थः भवति यत् जगत ब्रह्मणः तात्विक परिवर्तनस्य स्वरूपं वर्तते। जगतः ब्राह्मणः तात्विक परिवर्तन न भूते सत्यपि ब्रह्मजगतोः मध्ये विवर्तभावः वर्तते।

**"अतत्त्वतोऽन्यथा प्रथाविवर्त इत्युदीरितः[10]।**

विवर्तवादः माया अविद्या अध्यासादि च विषयकसिद्धान्ताः शांकरवेदान्तस्य भावं दार्शनिक प्रसादस्य अविचलित स्तम्भं वर्तते। इमानि सर्वाणि नद्वैतवेदान्तस्य प्रचलयौगिकाधारः वर्तते। आचार्यशंकरेणः परिणामवादस्य प्रतिकूलतया विवर्तवादस्य प्रतिपादनं क्रियते।

विवर्तवादानुसारेण मूलतत्वं अ...बत्रितुमर्हति? अतएव आचार्यस्य कथनमस्ति यत् जगत् ब्रह्मणः विवर्त वर्तते। शंकाराचार्यस्य मतमिदं ब्रह्मविवर्तवाद" इति नाम्ना व्यवह्रियते। विवर्तवादः आचार्यशंकरस्य दर्शनस्य हृदयं बर्ततेः प्राणतुल्यवर्तत। विवर्तवादाधारिकृत्यैव अद्वैतवेदान्तस्य जगद्विषयकवर्णनं तार्किकरीत्या प्रस्तुतिकरणेन आचार्येभ्यः सरलतया एवं प्राप्तं भवति।

**परिणामवादः-**

परिणामः **'वस्तुनस्ततसमानानसत्ताकोऽन्यथाभावः परिणामः[11]** ३०० अस्मिन् लक्षणे वस्तुशब्दात् नाद्धस्य वस्तुनोः ग्रहणं भवति वः उपादानत्वरूपेण अभिमतं स्यात् तथा च प्राक्ततरुपापेक्षया अन्यरुपेण अवस्थानुशिष्टः स्यात्। तत्समानसत्ताकः-तेन समा सत्ता यस्य अन्यथाभावस्य स तथा" अर्थात् उपादानभूतवस्तुनोः सत्ता तथा तेभ्यः समुतपन्नेभ्यः कार्यस्य च सत्ता समानाः भवेयुः। यथा मृत्तिकाय...

**परिणामवादः विवर्तमादश्च-**

कार्यकारणवादस्य विचारः क्रियमाणे मत्यपि जगतः कल्पना अनिर्वचनीयव सिध्यति। अद्वैतवेदान्ते 'आरम्भवादः तथा 'परिणामवादः उमवमपि भ्रममूलको कर्तत। परिणामवादीनः कार्यद्रव्यं अभिन्नस्तु मन्यन्ते अव तेन सांक भिन्नत्वं स्वीकृयन्ते परञ्च मतमिदं युक्तियुकः नास्ति। घटादि सर्वमपि मृत्तिकायाः कार्याणि वर्तन्ने अतः इमानि कार्याणि मृत्तिकालः अभिन्नः कर्ततः परञ्च प्रश्नमिदं समुदेति यत् उभयोः मध्ये अभिन्नत्वम् भूत्वाऽपि कङ्कारेण भित्नत्वं आगतम्? एवरीत्या एकस्मिनेव कार्यकारणयोः स्थले कथङ्कारं भेदाभेदः प्रतीतिः सञ्जायते? वस्तुतः एवं स्यात् यत् यदि एक सत्यमस्ति चेदपरं कल्पितम् अथवा भेदता स्यात् किन्तु अत्र नैवदृश्यते अभेदतायाः पारमार्थिक सत्ता नितरां समीचीनं वर्तते तव नेतायां कल्पितमत्ता स्वीकर्तुं ...

**ततोपादानता विश्वविवर्तस्पिदता चितः।**
**स्वाभिश्रन्यूनसत्तार्थो विवर्त इति कथ्यते[12]॥**

**विवर्तवादः एवञ्च सांख्यदर्शनस्य सत्कार्यवादः अथवा परिणामवादः-**

कार्यकारणवादसिद्धान्तस्य विवेचन सन्दर्भे सांख्यवादिनः सत्कार्यवादस्य अथवा परिणामवादस्य समर्थकाः सन्ति। सत्कार्यवादानुसारेण कारणे कार्यस्य सत्ता विद्यमानः वर्तते। सांख्यवादिनानुसारं घटपटौ मृत्तिकातन्तवोः परिणाममावएव वर्तते। अतः अयं सिद्धान्तः परिणामवाद इति नाम्ना व्यवह्रियते। परिणामवादविवर्तवादयोः तुलनात्मकमध्ययनं कृते सति। उभयोः मध्ये पर्याप्तरुपेण अन्तरं दृष्टिगोचरं भवति। यत्र विवर्तः नाम उत्पद्यमानः विषमकार्यस्य सत्तायाः नाम वर्तते, अन्यत्र अपरस्मिन् भागे परिणामुपादानस्य समानमेव कार्यस्य सत्तां अस्माभिः उच्यते।

"परिणामोनाम उत्पादनसमसत्ताककार्यापत्ति...[13]।

**विवर्तवादः असत्कार्यवादन सिद्धान्तः-**

न्यायवैशेषिकदार्शनिकैः असत्कार्यवादस्य सिद्धान्तस्व आधारेण कार्यकारणवादयोः या समस्या वर्तते तं दूरीकर्तुं प्रयत्नः क्रियते। सांख्य दर्शने विवेच्यमानः सत्कार्यवादे तथा च न्यायवैशेषिकदर्शनयोः मध्ये विवेच्यमानः यः असत्कार्यवादिनः सन्ति। उभयो मध्ये पर्याप्त भेदप्रभेदः वर्तते।

असत्कार्यवादीनः कारणे कार्यस्य सत्ता अमत् इति मन्त्वा कार्यस्य नवीनारम्भः मन्यते। अतः एवं असत्कार्यवादस्य सिद्धान्तः आरम्भवादः इति नाम्नोऽपि प्राचीनः वर्तते।

विवर्तवादीनामनुसारेण यत्र कार्यस्य सत्ता कारणेन पृथक् नास्ति, तात्र सत्कार्यवादिनः कार्यस्य सत्तां कारणेन पृथगेव मन्यते इदमेव उभयोः मध्ये मूलसिद्धान्त भेदः वर्तते।

**पाद टिप्पणी:**

[1]संक्षेपशारीरिकम् पृ,सं. 1-532

[2]ब्रह्मान्ददीः अद्वैतसिद्धि पृ.सं. 467

[3]ब्रह्मान्ददीः अद्वैतसिद्धि पृ.सं. 476

[4]ब्रह्मान्ददीः अद्वैतसिद्धि पृ.सं. 467

[5]सिद्धान्तलेशसंग्रह प्रथम. परि.

[6]अद्वैतसिद्धि पृ.सं. 237

[7]वेदान्तसार पृ.सं. 124

[8]वेदान्तसिद्धान्तमुक्तावली श्लोक 26

[9]वेदान्तपरिभाषा 1

[10] वेदान्तसार पृ.सं. 109

[11] वेदान्तसार पृ.सं. 102

[12] वेदान्तसार पृ.सं. 35

[13] वेदान्तसार पृ.सं. 39